ततस्तीर्थोदकैः स्नाता दिव्यवस्त्रैरलङ्कृता ।
दिव्यगन्धानुलेपैस्तु सुमनोभिः सुपूजिता ॥
देवपक्षं समासाद्य स्थिता क्षणमरिन्दम ! ।
हरिवक्षःस्थलं प्राप्ता ततः सा कमलालया ॥
ततोऽमृतघटं पूर्णं गृहीत्वा पयसोनिधेः ।
धन्वन्तरिः समुत्तस्थौ ततः प्रीताः सुरा नृप ॥
दैत्याः श्रिया परित्यक्ता दुःखितास्तत्र ते पुनः ।
आदायामृतघटं शीघ्रं ते च जग्मुर्यथेच्छया ॥
ततः स्त्रीरूपमकरोद्विष्णुरवञ्चिताय वै ।
आत्मानं नृपशार्दूल ! नार्य्या लक्षणसंयुतम् ॥
ततो जगाम भगवान् स्त्रीरूपेण सुरान् प्रति ।
दिव्यरूपान्तु तां दृष्ट्वा मोहितास्ते सुरद्विषः ॥
अमृतपूर्णं घटं भूमौ हैमं संस्थाप्य सत्तम ।
कामेन पीड़िता ह्यासन्नसुरास्तत्र तत्क्षणात् ॥
मोहयित्वा तु तानेवमसुरानवनीपते ! ।
अमृतभाजनमादाय देवेभ्यः प्रददौ हरिः ॥
तत् पीत्वा तु ततो देवा देवदेवप्रसादतः ।
बलवन्तो महावीर्य्या रणे जघ्नुर्महासुरान्" ॥
इति नृसिंहपुराणे २६ अध्यायः ॥

क्षीरोदतनया, स्त्री, (क्षीरोदस्य क्षीरसमुद्रस्य तनया ।) लक्ष्मीः । इति हेमचन्द्रः । (अस्या उत्पत्तिकथा क्षीरोदशब्दे द्रष्टव्या ॥)

क्षीरोदतनयापतिः, पुं, (क्षीरोदतनयाया लक्ष्म्याः पतिः ।) विष्णुः । इति कविकल्पलता ॥

क्षीरोदनन्दनः, पुं, (क्षीरोदस्य दुग्धसमुद्रस्य नन्दनः ।) चन्द्रः । इति शब्दरत्नावली ॥

क्षीव, ऋ ङ दर्पे । इति कविकल्पद्रुमः । (भ्वां-आत्मं-अकं-सेट् ।) ऋ, अचिक्षीवत् । ङ, क्षीवते । इति दुर्गादासः ॥

क्षीव, निरासे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) निरास इह फुत्कारः । इति भट्टमल्लः ॥ मुखेन श्लेष्मादेर्व्यमनमिति केचित् । क्षीवत्यन्नं लोकः । इति दुर्गादासः ॥

क्षीवः, त्रि, (क्षीव ङ मदे + क्तः । "अनुपसर्गात् फुल्लक्षीवेति" । ८ । २ । ५५ । तलोपो निपातनात् ।) सुरामत्तः । यथा । "मत्ते शौण्डोत्कटक्षीवाः" । इत्यमरः । २ । २ । २३ ॥ दन्त्योष्ठवकारान्तोऽयम् ॥
(यथा, रामायणे । ५ । ६० । १२ ।
"उन्मत्तभूताः प्लवगा मधुपानप्रहर्षिताः ।
क्षीवाः कुर्व्वन्ति हास्यं च कलहांश्च तथाऽपरे" ॥)

क्षु, टु ल क्षुते । इति कविकल्पद्रुमः ॥ (अदां-परं-अकं-सेट् ।) क्षुतं हाँची इति ख्यातम् । टु, क्षवथुः । ल, क्षौति कपी । क्षुतकं कामिनि चुक्षुवे मृगाक्ष्या । इति माघे । इति दुर्गादासः ॥

क्षुः, पुं, (क्षणोति हिनस्ति जीवान् इति । क्षण् हिंसायां + डुः ।) सिंहः । इत्येकाक्षरकोषः ॥

क्षुपः, पुं, (क्षु + पक् ।) अरिष्टवृक्षः । यथा,—
"अरिष्टो वस्तिकर्म्माण्डो वेणीवः फेनिलः क्षुपः" । इति शब्दचन्द्रिका ॥ (अरिष्टशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

क्षुण्णं, त्रि, (क्षुद संपेषणे + कर्म्मणि क्तः ।) प्रहतम् । (अभ्यस्तम् । यथा, रघौ । १ । १७ ।
"रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम्" ॥
माघे च । १ । ३२ ।
"उदीर्णरागप्रतिरोधकं जनै-
रभीक्ष्णमक्षुण्णतयातिदुर्गमम् ।
उपेयुषो मोक्षपथं मनस्विन-
स्त्वमग्रभूमिर्निरपायसंश्रया" ॥)
चूर्णीकृतम् । इति जटाधरः ॥
(यथा, मार्कण्डेयपुराणे । ८३ । २४-२५ ।
"सोऽपि कोपान्महावीर्य्यः क्षुरक्षुण्णमहीतलः ।
शृङ्गाभ्यां पर्व्वतानुच्चांश्चिक्षेप च ननाद च ॥
वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्य्यत" ॥)

क्षुत्, स्त्री, (क्षु शब्दे क्षुते च + सम्पदादित्वात् भावे क्विप् तुगागमश्च ।) क्षुतम् । इत्यमरः ।२।६।५२ ॥ (धान्यविशेषः । देधान इति लोके । अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम् ।
"क्षुत्गुल्मश्च गोजिह्वा च गुन्द्रागुल्मा गवेधुका" ॥)

क्षुत्, [ ध् ] स्त्री, ( क्षुध् + सम्पदादित्वात् भावे क्विप् ।) क्षुधा । इत्यमरः । २ । ९ । ५४ ॥
(यथा, मार्कण्डेयपुराणे । ८ । ३५ ।
"तात ! तात ! ददस्वान्नमम्बाम्ब ! भोजनं दद ।
क्षुन्मे बलवती जाता जिह्वाग्रं शुष्यते तथा" ॥)

क्षुतं, क्ली, ( क्षु शब्दे क्षुते च + भावे क्तः ।) नासिकाभिघातजन्यसशब्दवायुनिःसरणम् । हाँची इति भाषा । तत्पर्य्यायः । क्षुत् २ क्षवः ३ । इत्यमरः । २ । ६ । ५२ ॥ क्षुता ४ छिक्का ५ क्षवथुः ६ क्षुतः ७ । इति शब्दरत्नावली ॥ छिक्किः ८ । इति जटाधरः ॥ * ॥ तस्य शकुनानि यथा,—
"अथ क्षुताख्यं शकुनं क्रमेण
महाप्रभावं प्रतिभावयामः ।
नश्यन्ति यस्माच्छकुनाः समस्ता
मृगाधिनाथादिव वन्यसत्त्वाः ॥
सर्व्वस्य सर्व्वत्र च सर्व्वकालं
क्षुतं न कार्य्यं क्वचिदेव शस्तम् ।
यातुः क्षुते तेन न किञ्चिदेव
कुर्य्यात् क्षुतं प्राणहरञ्च गन्तुः ॥
निषेधमग्रेऽक्षिणि दक्षिणे च
धनक्षयं दक्षिणकर्णदेशे ।
तत् पृष्ठभागे कुरुतेऽर्थवृद्धिं
क्षुतं कदाचित् शुभमादधाति ॥
भोगाय वामश्रवणस्य पृष्ठे
कर्णे च वामे कथितं जयाय ।
सर्व्वार्थलाभाय च वामनेत्रे
जातं क्षुतं स्यात् क्रमशोऽष्टधैव ॥
क्रमान्निषेधं गमनस्य विघ्नं
कलिं समृद्धिं क्षुतमुग्ररोगम् ।
करोति रोगक्षयमर्थलाभं
दीप्तादिनाशस्य क्षुतं करोति ॥
प्राणास्य पुंसः परतोऽपरा स्यात्
पुनः पुनर्व्वा तत एव जातः ।
वृद्धाच्छिशोर्व्वा कफतो हठाद्वा
जातं क्षुतं केऽपि वदन्ति सत्यम् ॥
आद्यन्तयोर्न खजने प्रशस्तं
क्षुतं प्रशंसन्ति न भोजनादौ
भवेत् कथञ्चिद्यदि भोजनान्ते
भवेत्तदाग्रे न हि भोज्यलाभः ॥
आदौ क्षुतञ्चेत् शकुनैस्ततः किं
जातानजातान् शकुनान्निहन्ति ।
क्षुतं क्षणेनाच न संशयोऽस्मिन्
प्रयोजने यत्नकृतेऽपि जातम् ॥
क्षुतं क्षणात्तद्विनिहन्त्यवश्यं
कार्य्यात्मकेनापि मनागपीदम् ॥
तस्मादुपेक्ष्यं न विचक्षणेन
क्षुतं यतस्तात्तु फलं विधत्ते" ॥
इति वसन्तराजशाकुने क्षुतप्रकरणं तृतीयम् ॥
अपि च ।
"छिक्काया लक्षणं वक्ष्ये लभेत् पूर्व्वे महाफलम् ।
आग्नेये शोकसन्तापौ दक्षिणे हानिमाप्नुयात् ॥
नैर्ऋत्ये शोकसन्तापौ मिष्ठान्नञ्चैव पश्चिमे ।
अन्नं प्राप्नोति वायव्ये उत्तरे कलहो भवेत् ।
ईशाने मरणं प्रोक्तं प्रोक्तं छिक्काफलाफलम्" ॥
इति गारुड़े ज्योतिषके ६० अध्यायः ॥ * ॥
अन्यच्च । वर्षकृत्ये ।
"वित्तं ब्रह्मणि कार्य्यसिद्धिरतुला शक्रे हुताशे भयं
याम्यामभिभयं सुरद्विषि कलिर्लाभः समुद्रालये ।
वायव्यां वरवस्त्रगन्धसलिलं दिव्याङ्गना चोत्तरे
ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने ।
ज्येष्ठीवते क्षुतेऽप्येवमूचुः केचिच्च कोविदाः" ॥
इति ॥ * ॥ क्षुते जीवेति प्रयोगः कर्त्तव्यः । यथा, मदनपारिजातधृतम् ।
"जीवेति क्षुवतो ब्रूयात् जीवेत्युक्तस्त्वया सह" ॥
इति ॥ * ॥
"क्षुतोत्पतनजृम्भासु जीवोत्तिष्ठाङ्गुलिध्वनिः ।
शत्रोरपि च कर्त्तव्यमन्यथा ब्रह्महा भवेत्" ॥
इति च तिथ्यादितत्त्वम् ॥ * ॥ तस्य शुभजनकत्वम् । यथा, दाक्षिणात्यास्तु ।
"आसने शयने दाने भोजने वस्त्रसंग्रहे ।
विवादे च विवाहे च क्षुतं सप्तसु शोभनम्" ॥
अन्यत्र विष्णोरित्यधिकृत्य विष्णुधर्म्मोत्तरम् ।
"नामसंकीर्त्तनं नित्यं क्षुतप्रस्खलितादिषु ।
वियोगं शीघ्रमाप्नोति सर्व्वानर्थो न संशयः" ॥
इति ॥ * ॥ असंवृतमुखस्य क्षुन्निषेधो यथा,—
विष्णुधर्म्मोत्तरे ।
"नासंवृतमुखः कुर्य्याद्धास्यं जृम्भां तथा क्षुतम्" ।
इति ॥ * ॥ क्षुते आचमनं कर्त्तव्यं यथा । याज्ञवल्क्यः ।
"स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे ।
आचान्तः पुनराचामेत् वासोविपरिधाय च" ॥
इति ॥ * ॥ अशक्तौ स्मृतिः ।
"क्षुते निष्ठीविते सुप्ते परिधानेऽश्रुपातने ।
कर्म्मस्थ एषु नाचामेद्दक्षिणं श्रवणं स्पृशेत्" ॥
इति च उद्वाहतत्त्वम् ॥ * ॥ बलिनां सकृत् क्षुतं भवति यथा,—
"क्रूरे दक्षिणवक्रा स्याद्बलिनाञ्च क्षुतं सकृत्" ।